# ।। श्री इष्टलिङ्गपूजाविधिः ।।

**संपादक**

**डॉ. शशिकांत बसवेश्वर दरगु मोदी**

शिवधर्मविद्यावाचस्पती, सहयोगी प्राध्यापक,
संस्कृत विभाग व संशोधन केंद्र
नेताजी सुभाषचंद्र बोस कला, वाणिज्य व विज्ञान महाविद्यालय, नांदेड. महाराष्ट्र

**प्रकाशक**

**नंदी शोध संस्थान, नांदेड.**

२०२५

**ISBN No. 978-81-976041-5-7**

**Shri Ishtalingapoojavidhih**

- **Editor**

**Dr. Shashikant Basveshwar Dargu Modi**
Shivadharmavidhyavachaspati
Associate Professor & Head
Department of Sanskrit & Research Centre, Netaji Subhashchandra Bose
Arts, Commerce and Science College, Nanded. 431604 Maharashtra

- **Published By**

**Nandi Foundation, Juna ganj, Nanded.**
Email : nandifoundation45@gmail.com
**Siddhi Publication, Nanded.**

© **Author** All rights reserved.

- **Price: 10/-**

।।श्री जगद्गुरुपंचाचार्याः प्रसीदन्तु।।

।।श्री सिद्धेश्वरो विजयतेतराम्।।

# ।। श्री इष्टलिङ्गपूजाविधिः।।

## स्नानम्

**पुनंतु मा देवजनाः पुनंतु मनसाधियः ।**
**पुनंतु विश्वाभूतानि जातवेदः पुनीहि मा ।।**

सोवळे किंवा शुभ्रवस्त्र धारण करुन पूजागृहापर्यंत पाणी शिंपडीत जावे.

त्यानंतर–

**ॐ सर्वज्ञाय नमः।**

हा मंत्र म्हणत पूजागृहात प्रवेश करावा. त्यानंतर आसनाची पूजा करावी.

**पृथ्वी त्वया धृता लोका देवि त्वं विष्णुना धृता ।**
**त्वं च धारय मां देवि पवित्रं कुरु चासनम् ।।**

हा मंत्र म्हणून आसनावर पूर्व किंवा उत्तरेकडे मुख करुन बसावे. त्यानंतर

आचमन करुन एका फुलपात्रात गाळलेले पाणी भरून घ्यावे, त्यावर ॐ लिहावा.

**गंगे च यमुने चैव गोदावरि सरस्वति ।**
**नर्मदे सिंधु कावेरि जलेऽस्मिन्सन्निधिं कुरु ।।**

या मंत्राने अभिमंत्रून, त्या मंत्रोदकाने पूजासामग्री परिशुद्ध करावी.

**अपसर्पन्तु ये भूता ये भूता भूवि संस्थिताः ।**
**ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ।।**

या मंत्राने १० दिशांना पाणी शिंपडावे. त्यानंतर ॐ शिवाय नमः, ॐ शंकराय नमः, ॐ महेश्वराय नमः या मंत्रांसह तीन वेळा आचमन करावे. त्यानंतर प्राणायाम करावा.

**।। संकल्पः ।।**

**हरः ॐ शिव शिव शंभोराज्ञया प्रवर्तमानस्याद्यब्रह्मणो व्दितीय परार्धे श्वेतवराहकल्पे वैवस्वतमन्वन्तरे कलियुगे प्रथमपादे जंबूद्वीपे भरतवर्षे भरतखंडे मेरोर्दक्षिणदिग्भागे महाराष्ट्रदेशे व्यावहारिकचांद्रमाने शालीवाहनशके प्रभवादिषष्टि संवत्सराणां मध्ये**

( ) संवत्सरे ( ) अयने ( ) मासे ( ) पक्षे ( ) वासरे ( ) नक्षत्रे ( ) योगे ( ) करणययुक्तायां ( ) शुभतिथौ ( ) गोत्रोत्पन्नोऽहं ममोपात्तदुरितक्षयव्दारा श्रीपार्वतीपरमेश्वरप्रीत्यर्थम् इष्टलिङ्गपूजां करिष्ये।

असा संकल्प करुन दोन्ही हात जोडून श्रीगुरु व शिवध्यान करावे.

**।। गुरुध्यानम् ।।**

**पंचाननतनूद्भूतान् पंचाक्षरमनुपमान् ।**
**पंचसूत्रकृतो वंदे पंचाचार्यान् जगद्गुरुन् ।।**

**।। शिवध्यानम् ।।**

**हृत्पद्मं शिवधर्मकंदसहितं सुज्ञाननालं तथा ।**
**नित्यैश्वर्यदळाष्टकं शशिनिभं वैराग्यसत्कर्णिकम् ।।**
**श्रीरुद्रेश्वरकेसरान्वितमिदं संचिन्त्य तन्मध्यमे ।**
**सूर्येंदूज्वलवह्निमंडलगतं ध्याये शिवं चिन्मयम् ।।**

यानंतर प्रणवाचा उच्चार करीत कुरंगमुद्रेने (अंगुष्ठ, अनामिका व मध्यमा या तीन बोटांनी) भस्म घेऊन डाव्या हाताच्या तळव्यावर ठेवून, बेल, फुले अर्पण करुन पूजन करावे. दोन्ही हातास भस्म लावून अंगुष्ठादी पंचांगुलीवर यकारादि नकारांत पंचाक्षरीमंत्र उच्चारीत भस्मन्यास करावा.

**ॐ अस्य श्रीविभूतिधारण महामंत्रस्य पिप्पलाद ऋषिः। देवीगायत्री छंदः। कालाग्निरुद्रो देवता।। अग्निरिति बीजम्। भस्मेति शक्तिः। शिव इति कीलकम्। मम शिवज्ञानसंपत्सिद्ध्यर्थं भस्मधारणे विनियोगः।।**

**।। करन्यासः ।।**

**ॐ कालाय नमः - अंगुष्ठाभ्यां नमः। कलविकरणाय नमः-तर्जनीभ्यां नमः। बलविकरणाय नमो बलाय नमः- मध्यमाभ्यां नमः। बलप्रमथनाय नमः- अनामिकाभ्यां नमः। सर्वभूतदमनाय नमः- कनिष्ठिकाभ्यां नमः। मनोन्मनाय नमः- करतलकरपृष्ठाभ्यां नमः।।**

## ।। अंगन्यासः ।।

**ॐ कालाय नमः– हृदयाय नमः। कलविकरणाय नमः– शिरसे स्वाहा। बलविकरणाय नमो बलाय नमः– शिखायै वषट्। बलप्रमथनाय नमः–कवचाय हूं। सर्वभूतदमनाय नमः– नेत्रत्रयाय वौषट्। मनोन्मनाय नमः–अस्त्राय फट्।।**

असा न्यास केल्यानंतर भस्मास नमस्कार करुन त्यावर उजवा हात ठेवून, उजव्या मांडीवर ठेवून मौन धारण करुन पंचाक्षरीमंत्राने ८ वेळा अभिमंत्रित करावे.

## ।। भस्मस्नानम् ।।

**ईशानः सर्वविद्यानामीश्वरः सर्वभूतानाम् ।**
**ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् ।।**

या मंत्राने ५ वेळा मस्तकावर **( शशिन्यै नमः, अंगदाय नमः, इष्टदायै नमः, मरीच्यै नमः, ज्वलिन्यै नमः)**

**तत्पुरुषाय विद्महे महादेवाय धीमहि।**
**तन्नो रुद्रः प्रचोदयात्।।**

या मंत्राने ४ वेळेस मुखावर **(शान्त्यै नमः, विद्यायै नमः, प्रतिष्ठायै नमः, निवृत्त्यै नमः)**

**ॐ अघोरेभ्योऽथघोरेभ्योघोरघोरतरेभ्यः ।**
**सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ।।**

या मंत्राने ८ वेळेस हृदयावर **( तामस्यै नमः, मोहाय नमः, क्षुधायै नमः, निद्रायै नमः, मृत्यवे नमः, मायायै नमः, अभयाय नमः, जरायै नमः)**

**ॐ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः।।**

या मंत्राने १३ वेळा नाभी खालील गुह्यभागावर **( राजस्यै नमः, रक्षायै नमः, रत्यै नमः, पालिन्यै नमः, कामायै नमः, संयमिन्यै नमः, क्रियायै नमः, बुद्धये नमः, ब्राह्मण्यै नमः, धात्र्यै नमः, भ्रामिण्ये नमः, मोहिन्यै नमः ग्रामिण्यै नमः)**

**ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः ।**
**भवे भवे नातिभवे भवस्व मां भवोद्भवाय नमः ।।**

या मंत्राने ८ वेळेस पायांवर **( सिद्धये नमः, ऋद्धये नमः, द्युत्यै नमः, लक्ष्म्यै नमः, मेधायै नमः, शान्त्यै नमः, स्वधायै नमः, धृत्यै नमः)**

ॐ या प्रणवाने सर्वांगावर भस्म सिंचन करावे.

**।। भस्मधारणम् ।।**

त्यानंतर भस्मधारणेसाठी आवश्यक तेवढे भस्म डाव्या हातावर घेऊन त्यावर उजवा हात झाकून

**अग्निरिति भस्म, वायुरिति भस्म, जलमिति भस्म, स्थलमिति भस्म, व्योमेति भस्म, भस्मेति भस्म, सर्वं हवा इदं भस्म मन इत्येतानि चक्षुंषि भस्मानि ।।**

मंत्रपूर्वक भस्म ७ वेळा पंचाक्षर मंत्राने अभिमंत्रून भस्मात पाणी मिसळावे.

**मानस्तोके तनये मान आयुषि मानो गोषु मानो अश्वेषु रीरिषः ।**
**वीरान्मानो रुद्र भामितो वधीर्हविष्मन्तो मनसा विधेम ते ।।**

या मंत्राने भस्म अनामिका बोटाने जलमिश्रित करावे.

**त्रियायुषं जमदग्नेः कश्यपस्य त्रियायुषम् ।**
**अगस्तस्य त्रियायुषं यद्देवानां त्रियायुषं तन्मे अस्तु त्रियायुषम् ।।**

हा मंत्र म्हणुन त्रिपुण्ड्र धारण करावे.

| | | |
|---|---|---|
| **१.** | **मस्तकावर** | **ॐ शिवाय नमः** |
| **२.** | **कपाळावर** | **ॐ महेश्वराय नमः** |
| **३–४.** | **दोन्ही कानांवर** | **ॐ रुद्राय नमः** |
| **५.** | **कंठावर** | **ॐ श्रीकंठाय नमः** |
| **६–७.** | **दोन्ही भुजांवर** | **ॐ शंभवे नमः** |
| **८.** | **हृदयावर** | **ॐ ईश्वराय नमः** |
| **९.** | **नाभीवर** | **ॐ महादेवाय नमः** |
| **१०.** | **पाठीवर** | **ॐ पशुपतये नमः** |
| **११–१२.** | **दोन्ही कोपरांवर** | **ॐ शंकराय नमः** |
| **१३.** | **खांद्यावर** | **ॐ वृषभध्वजाय नमः** |
| **१४–१५.** | **दोन्ही मनगटावर** | **ॐ परमात्मने नमः** |

या नंतर रूद्राक्षांचे पूजन करावे व नमस्कार करुन स्थान व मुखानुसार रूद्राक्ष धारण करावेत.

।। रूद्राक्षधारण मंत्रः ।।

रूद्राक्षवृक्षबीजाय भूतिसंभूति हेतवे ।
नेत्रत्रयाय रूद्राय नमो लोकहितार्थिने।।

।। पंचाक्षर मन्त्रन्यासक्रमः।।

ॐ अस्य श्रीपंचाक्षरमहामन्त्रस्य वामदेवऋषिः (शिरसि)। पंक्तिः छंदः (मुखे)। श्रीसदाशिवदेवता (हृदये)। ॐ बीजं (नाभौ)। उमा शक्तिः(गुह्ये)। शिव इति कीलकं (पादयोः)। श्रीसदाशिवप्रीत्यर्थे जपे विनियोगः।

ब्रह्मचारिणां कृते सृष्टिन्यासः

।। करन्यासः ।।

ॐ यं ॐ अलुप्तशक्तिधाम्ने अंगुष्ठाभ्यां नमः। ॐ वां ॐ स्वतंत्रशक्तिधाम्ने तर्जनीभ्यां नमः। ॐ शिं ॐ अनादिबोधशक्तिधाम्ने मध्यमाभ्यां नमः। ॐ मं ॐ नित्यतृप्तिशक्तिधाम्ने अनामिकाभ्यां नमः। ॐ नं ॐ सर्वज्ञशक्तिधाम्ने कनिष्ठिकाभ्यां नमः। ॐ ॐ ॐ अनंतशक्तिधाम्ने करतलकरपृष्टाभ्यां नमः।

### ।। देहन्यासः ।।

ॐ यं ॐ ईशानाय नमः। ॐ वां ॐ तत्पुरुषाय नमः। ॐ शिं ॐ अघोराय नमः। ॐ मं ॐ वामदेवाय नमः। ॐ नं ॐ सद्योजाताय नम। ॐ ॐ ॐ प्रणवाय नमः।

### ।। अंगन्यासः ।।

ॐ यं ॐ अलुप्तशक्तिधाम्ने हृदयाय नमः। ॐ वां ॐ स्वतंत्रशक्तिधाम्ने शिरसे स्वाहा। ॐ शिं ॐ अनादिबोधशक्तिधाम्ने शिखायै वषट्। ॐ मं ॐ नित्यतृप्तिशक्तिधाम्ने कवचाय हुं। ॐ नं ॐ सर्वज्ञशक्तिधाम्ने नेत्रत्रयाय वौषट्। ॐ ॐ ॐ अनंतशक्तिधाम्ने अस्त्राय फट् भूर्भुवस्सुवरोमिति दिग्बन्धः।

### गृहस्थानां कृते स्थितिन्यासः

### ।। करन्यासः ।।

ॐ शिं ॐ अनादिबोधशक्तिधाम्ने मध्यमाभ्यां नमः। ॐ वां ॐ स्वतंत्रशक्तिधाम्ने

तर्जनीभ्यां नमः। ॐ यं ॐ अलुप्तशक्तिधाम्ने अंगुष्ठाभ्यां नमः। ॐ नं ॐ सर्वज्ञशक्तिधाम्ने कनिष्ठिकाभ्यां नमः। ॐ मं ॐ नित्यतृप्तिशक्तिधाम्ने अनामिकाभ्यां नमः। ॐ ॐ ॐ अनंतशक्तिधाम्ने करतलकरपृष्टाभ्यां नमः।

।। देहन्यासः ।।

ॐ शिं ॐ अघोराय नमः। ॐ वां ॐ तत्पुरुषाय नमः। ॐ यं ॐ ईशानाय नमः। ॐ नं ॐ सद्योजाताय नम। ॐ मं ॐ वामदेवाय नमः। ॐ ॐ ॐ प्रणवाय नमः।

।। अंगन्यासः ।।

ॐ शिं ॐ अनादिबोधशक्तिधाम्ने शिखायै वषट्। ॐ वां ॐ स्वतंत्रशक्तिधाम्ने शिरसे स्वाहा। ॐ यं ॐ अलुप्तशक्तिधाम्ने हृदयाय नमः। ॐ नं ॐ सर्वज्ञशक्तिधाम्ने नेत्रत्रयाय वौषट्। ॐ मं ॐ नित्यतृप्तिशक्तिधाम्ने कवचाय हुं। ॐ ॐ ॐ अनंतशक्तिधाम्ने अस्त्राय फट् भूर्भुवस्सुवरोमिति दिग्बन्धः।

## संन्यस्तानां कृते संहारन्यासः

### ।। करन्यासः ।।

ॐ नं ॐ सर्वज्ञशक्तिधाम्ने कनिष्ठिकाभ्यां नमः। ॐ मं ॐ नित्यतृप्तिशक्तिधाम्ने अनामिकाभ्यां नमः। ॐ शिं ॐ अनादिबोधशक्तिधाम्ने मध्यमाभ्यां नमः। ॐ वां ॐ स्वतंत्रशक्तिधाम्ने तर्जनीभ्यां नमः। ॐ यं ॐ अलुप्तशक्तिधाम्ने अंगुष्ठाभ्यां नमः। ॐ ॐ ॐ अनंतशक्तिधाम्ने करतलकरपृष्टाभ्यां नमः।

### ।।देहन्यासः।।

ॐ नं ॐ सद्योजाताय नम। ॐ मं ॐ वामदेवाय नमः। ॐ शिं ॐ अघोराय नमः। ॐ वां ॐ तत्पुरुषाय नमः। ॐ यं ॐ ईशानाय नमः। ॐ ॐ ॐ प्रणवाय नमः।

### ।।अंगन्यासः।।

ॐ नं ॐ सर्वज्ञशक्तिधाम्ने नेत्रत्रयाय वौषट्। ॐ मं ॐ नित्यतृप्तिशक्तिधाम्ने कवचाय हुं। ॐ शिं ॐ अनादिबोधशक्तिधाम्ने शिखायै वषट्। ॐ वां ॐ

**स्वतंत्रशक्तिधाम्ने शिरसे स्वाहा। ॐ यं ॐ अलुप्तशक्तिधाम्ने हृदयाय नमः। ॐ ॐ ॐ अनंतशक्तिधाम्ने अस्त्राय फट् भूर्भुवस्सुवरोमिति दिग्बन्धः।**

गुरुपदिष्ट मंत्रांचा १०८ किंवा १००८ वेळा जप करावा.

**।।पाद्यम्।।**

**यद्भक्तिलेशसंपर्कात्परमानंदसंभवः ।**
**तस्मै ते चरणाब्जाय पाद्यं शुद्धाय कल्पये ।।**

ॐ सुवः श्रीसांबाय नमः पाद्यं समर्पयामि।

**।।अर्घ्यमंत्रः।।**

**तापत्रयहरं दिव्यं परमानंदलक्षणम् ।**
**तापत्रयविनिर्मुक्त्यै तवार्घ्यं कल्पयाम्यहम् ।।**

ॐ महः श्रीसांबाय नमः अर्घ्यं समर्पयामि ।

**।।आचमनम्।।**

**वेदानामपि वेदाय देवानां देवतात्मने ।**
**आचमं कल्पयामीश शुद्धानां शुद्धिहेतवे ।।**

ॐ जनः श्रीसांबाय नमः आचमनं समर्पयामि ।

**।। मधुपर्कम् ।।**

**सर्वकालुष्यहीनाय परिपूर्णसुखात्मने ।**
**मधुपर्कं महादेव कल्पयामि प्रसीद मे ।।**

ॐ तपः श्रीसांबाय नमः मधुपर्कं समर्पयामि ।

**।। स्नानम् ।।**

**परमानंदबोधाब्धौ निमग्ननिजमूर्तये ।**
**सांगोपांगमिदं स्नानं कल्पयामि प्रसीद मे ।।**

ॐ सत्यं श्रीसांबाय नमः स्नानं समर्पयामि।

**।।क्षीरम्।। (दूध)**

**आप्यायस्य समेतु ते विश्वतस्सोम वृष्णियम्।**

**भवा वाजस्य संगथे।।**

श्री सांबाय नमः क्षीरेण स्नापयामि, ईशानमंत्रेण शुद्धोदकेन स्नापयामि।

**।।दधि।। (दही)**

**दधिक्रावणोअकारिषंजिष्णोरश्वस्यवाजिनः।**

**सुरभिनो मुखाकरत्प्राण आयूंषि तारिषत् ।।**

श्री सांबाय नमः दध्ना स्नापयामि, तत्पुरुषमंत्रेण शुद्धोदकेन स्नापयामि।

**।।घृतम्।।**

**शुक्रमसि ज्योतिरसि तेजोऽसि देवो वस्सवितोत्पुना ।**

**त्वच्छिद्रेण पवित्रेण वसोस्सूर्यस्य रश्मिभिः ।।**

श्री सांबाय नमः घृतेन स्नापयामि, अघोरमंत्रेण शुद्धोदकेन स्नापयामि।

**।। मधु ।। (मध)**

**मधुवाता ऋतायते मधु क्षंरति सिंधवः। माध्वीनर्स्संत्वोषधीः।**

**मधुनक्तमुतोषसो मधुमत्पार्थिवं रजः। मधु द्यौरस्तु नः पिता।**

**मधुमान्नो वनस्पतिर्मधुमाम् अस्तु सूर्यः। माध्वीर्गावो भवन्तु नः।।**

श्री सांबाय नमः मधुना स्नापयामि, वामदेवमंत्रेण शुद्धोदकेन स्नापयामि।

**शर्करामन्त्रः। (साखर)**

**स्वादुः पवस्व दिव्याय जन्मने स्वादुरिंद्राय सुह वीतु नाम्ने ।**

**स्वादुर्मित्राय वरुणाय वायवे बृहस्पतये मधु माम् अदाभ्यः ।।**

श्री सांबाय नमः शर्करया स्नापयामि, सद्योजातमंत्रेण शुद्धोदकेन स्नापयामि।

**श्री गुरुभ्यो नमः। हरः ॐ। ॐ गणानां त्वा गणपति ँ हवामहे कविं कवीनामुपमश्रवस्तमम्। ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आनः शृण्वन्नूतिभिस्सीद सादनम्।।**

## श्री रुद्राध्यायेन महाभिषेकः।

हरः ॐ। अस्य श्री रुद्रस्य प्रश्नस्य अनुष्टुप् छन्दः, अघोर ऋषिः, संकर्षणमूर्तिस्वरूपो योऽसावादित्यः परमपुरुषः स एष रुद्रो देवता, अग्निक्रतुचरमायामिष्टिकायां शतरुद्रीय जपाभिषेकयोर्विनियोगः। ॐ सकलस्य रुद्राध्यायस्य श्री रुद्रो देव–ता, एका गायत्रीच्छन्दः, तिस्त्रोऽनुष्टुभस्तिस्त्रः पंक्तयः, सप्तानुष्टुभो द्वे जगत्यौ, श्री परमेष्ठी ऋषिः, श्री परमेश्वरप्रीत्यर्थे शतरुद्रीयजपेऽभिषेके च विनियोगः।

### ।। करन्यासः ।।

अग्निहोत्रात्मने अंगुष्ठाभ्यां नमः। दर्शपूर्णमासात्मने तर्जनीभ्यां नमः। चातुर्मासात्मने मध्यमाभ्यां नमः। निरूढपशुबंधात्मने अनामिकाभ्यां नमः। ज्योतिष्टोमात्मने कनिष्ठिकाभ्यां नमः। सर्वक्रत्वात्मने करतलकरपृष्टाभ्यां नमः।

### ।। देहन्यासः ।।

अग्निहोत्रात्मने हृदयाय नमः। दर्शपूर्णमासात्मने शिरसे स्वाहा। चातुर्मासात्मने शिखायै वषट्। निरूढपशुबंधात्मने कवचाय हुं। ज्योतिष्टोमात्मने नेत्रत्रयाय

वौषट्। सर्वक्रत्वात्मने अस्त्राय फट्। भूर्भुवः सुवरोमिति दिग्बन्धः।।

।। ध्यानम् ।।

ॐआपातालनभःस्थलान्तभुवनब्रह्माण्डमाविस्फुररज्ज्योतिस्फाटिकलिङ्ग- मौलिविलसत्पूर्णेन्दुवान्तामृतैः अस्तोकाप्लुतमेकवारमनिशं रुद्रानुवाकान् जपन् ध्यायेदीप्सितसिद्धये ध्रुवपदं विप्रोऽभिषिञ्चेच्छिवम्।।१।। ब्रह्माण्डव्याप्तदेहा भसितहिमरुचा भासमाना भुजङ्गैः कण्ठे कालाः कपर्दाकलितशशिकलाश्चण्ड कोदण्डहस्ताः। त्र्यक्षा रुद्राक्षभूषास्सुललितविभवाश्शांभवा मूर्तिभेदा रुद्राः श्रीरुद्रसूक्तप्रकटितविभवा नः प्रयच्छन्तु सौख्यम्।।२।।शुद्धस्फटिकसंकाशं शुद्धविद्याप्रदायकम् । शुद्धं पूर्णचिदानन्दं सदाशिवमहं भजे ।।३।।

।।श्री रुद्रः (नमकम्) ।।

ॐ नमो भगवते रुद्राय।। नमस्ते रुद्र मन्यव उतो त इषवे नमः। नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः।।१.१।। या त इषुः शिवतमा शिवं बभूव ते धनुः। शिवा शरव्या या तव तया नो रुद्र मृडय।।१.२।। या ते रुद्र शिवा तनूरघोराऽपापकाशिनी।

तया नस्तनुवा शन्तमया गिरिशंताभि चाकशीहि।।१.३।। यामिषुं गिरिशंत हस्ते बिभर्ष्यस्तवे। शिवां गिरित्र तां कुरु मा हिꣳसीः पुरुषं जगत्।।१.४।। शिवेन वचसा त्वा गिरिशाच्छा वदामसि। यथा नः सर्वमिज्जगदयक्ष्मꣳ सुमना असत्।।१.५।। अध्यवोचदधिवक्ता प्रथमो दैव्योभिषक्। अहीꣳश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्यः।।१.६।। असौ यस्ताम्रो अरुण उत बभ्रुः सुमंगलः। ये चेमाꣳ रुद्रा अभितो दिक्षु। श्रिताः सहस्रशोऽवैषाꣳ हेड ईमहे।।१.७।। असौ योऽवसर्पति नीलग्रीवो विलोहितः। उतैनं गोपा अदृशन्नदृशन्नुदहार्यः। उतैनं विश्वा भूतानि सदृष्टो मृडयातिनः।।१.८।। नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे। अथो ये अस्य सत्वानोऽहं तेभ्योऽकरन्नमः।।१.९।। प्रमुंच धन्वनस्त्वमुभयोरार्त्नियोर्ज्याम्। याश्च ते हस्त इषवः परा ता भगवो वप।।१.१०।। अवतत्य धनुस्त्वꣳ सहस्राक्ष शतेषुधे। निशीर्य शल्यानां मुखा शिवो नः सुमना भव।।१.११।। विज्यं धनुः कपर्दिनो विशल्यो बाणवा उत। अनेशन्नस्येषव आभुरस्य निषंगथिः।।१.१२।। या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः। तयाऽस्मान्विश्वतस्त्वमयक्ष्मया

परिब्भुज।।१.१३।। नमस्ते अस्त्वायुधायानातताय धृष्णवे। उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने।।१.१४।। परि ते धन्वनो हेतिरस्मान् वृणक्तु विश्वतः। अथो य इषुधिस्तवारे अस्मन्निधेहि तम्।।१.१५।। नमस्ते अस्तु भगवन्विश्वेश्वराय महादेवाय त्र्यम्बकाय त्रिपुरान्तकाय त्रिकालाग्निकालाय कालाग्निरुद्राय नीलकण्ठाय मृत्युंजयाय सर्वेश्वराय सदाशिवाय श्रीमन्महादेवाय नमः।।२.०।।

।।इति प्रथमोऽनुवाकः।।

नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमो नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमो नमः सस्पिञ्जराय त्विषीमते पथीनां पतये नमो नमो बभ्लुशाय विव्याधिनेऽन्नानां पतये नमो नमो हरिकेशायोपवीतिने पुष्टानां पतये नमो नमो भवस्य हेत्यै जगतां पतये नमो नमो रुद्रायाततताविने क्षेत्राणां पतये नमो नमः सूतायाहन्त्याय वनानां पतये नमो नमः।।२.१।। रोहिताय स्थपतये वृक्षाणां पतये नमो नमो मन्त्रिणे वाणिजाय कक्षाणां पतये नमो नमो भुवंतये

वारिवस्कृतायौषधीनां पतये नमो नम उच्चैर्घोषायाक्रन्दयते पत्तीनां पतये नमो नमः कृत्स्नवीताय धावते सत्वनां पतये नमः।।२.२।।

।।इति द्वितीयोऽनुवाकः।।

नमः सहमानाय निव्याधिन आव्याधिनीनां पतये नमो नमः ककुभाय निषङ्गिणे स्तेनानां पतये नमो नमो निषङ्गिण इषुधिमते तस्कराणां पतये नमो नमो वञ्चते परिवञ्चते स्तायूनां पतये नमो नमो निचेरवे परिचरायारण्यानां पतये नमो नमः सृकाविभ्योजिघाꣳ सद्भ्योमुष्णतां पतये नमो नमोऽसिमद्भ्यो नक्तं चरद्भ्यः प्रकृन्तानां पतये नमो नम उष्णीषिणे गिरिचराय कुलुञ्चानां पतये नमो नमः ।।३.१।। इषुमद्भ्यो धन्वाविभ्यश्चवो नमो नम आतन्वानेभ्यः प्रतिदधानेभ्यश्चवो नमो नम आयच्छद्भ्यो विसृजद्भ्यश्च वो नमो नमोऽस्यद्भ्यो विद्ध्यद्भ्यश्च वो नमो नम आसीनेभ्यः शयानेभ्यश्च वो नमो नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमो नमः सभाभ्यः सभापतिभ्यश्च वो नमो नमो अश्वेभ्योऽश्वपतिभ्यश्च वो नमः।।३.२।।

।।इति तृतीयोऽनुवाकः।।

नम आव्याधिनीभ्यो विविध्यन्तीभ्यश्च वो नमो नम उगणाभ्यस्तृँ हतीभ्यश्च वो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो विरुपेभ्यो विश्वरुपेभ्यश्च वो नमो नमो महद्भ्यः क्षुल्लकेभ्यश्च वो नमो नमोरथिभ्योऽरथेभ्यश्च वो नमो नमो रथेभ्यः ।।४.१।। रथपतिभ्यश्च वो नमो नमः सेनाभ्यः सेनानिभ्यश्च वो नमो नमः क्षत्तृभ्यः संग्रहीतृभ्यश्च वो नमो नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमो नमः पुञ्जिष्टेभ्यो निषादेभ्यश्च वो नमो नम इषुकृद्भ्यो धन्वकृद्भ्यश्च वो नमो नमो मृगयुभ्यःश्वनिभ्यश्च वो नमो नमः श्वभ्यः श्वपतिभ्यश्च वो नमः।।४.२।।

।।इति चतुर्थोऽनुवाकः।।

नमो भवाय च रुद्राय च नमः शर्वाय च पशुपतये च नमो नीलग्रीवाय च शितिकण्ठाय च नमः कपर्दिने च व्युप्तकेशाय च नमः सहस्राक्षाय च शतधन्वने

च नमो गिरिशाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषुमते च नमो ह्रस्वाय च वामनाय च नमो बृहते च वर्षीयसे च नमो वृद्धाय च संवृद्ध्वने च।।५.१।। नमो अग्रियाय च प्रथमाय च नम आशवे चाजिराय च नमः शीघ्रियाय च शीभ्याय च नम ऊर्म्याय चावस्वन्याय च नमःस्त्रोतस्याय च द्वीप्याय च।।५.२।।

।।इति पंचमोऽनुवाकः।।

नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय चापरजाय च नमो मध्यमाय चापगल्भाय च नमो जघन्याय च बुध्नियाय च नमः सोभ्याय च प्रतिसर्याय च नमो याम्याय च क्षेम्याय च नम उर्वर्याय च खल्याय च नमः श्लोक्याय चावसान्याय च नमो वन्याय च कक्ष्याय च नमः श्रवाय च प्रतिश्रवाय च।।६.१।। नम आशुषेणाय चाशुरथाय च नमः शूराय चावभिन्दते च नमो वर्मिणे च वरुथिने च नमो बिल्मिने च कवचिने च नमः श्रुताय च श्रुतसेनाय च।।६.२।।

।।इति षष्ठोऽनुवाकः।।

नमो दुन्दुभ्याय चाऽऽहनन्याय च नमो धृष्णवे च प्रमृशाय च नमो दूताय च प्रहिताय च नमो निषङ्गिणे चेषुधिमते च नमस्तीक्ष्णेषवे चाऽऽयुधिने च नमः

स्वायुधाय च सुधन्वने च नमः स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च नमः सूद्याय च सरस्याय च नमो नाद्याय च वैशन्ताय च।।७.१।। नमः कूप्याय चावट्याय च नमो वर्ष्याय चावर्ष्याय च नमो मेघ्याय च विद्युत्याय च नम ईध्रियाय चाऽऽतप्याय च नमो वात्याय च रेष्मियाय च नमो वास्तव्याय च वास्तुपाय च।।७.२।।

।।इति सप्तमोऽनुवाकः।।

नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च नमः शङ्गाय च पशुपतये च नम उग्राय च भीमाय च नमो अग्रेवधाय च दूरेवधाय च नमो हन्त्रे च हनीयसे च नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय च तारकाय च नमः शम्भवे च मयो भवे च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च।।८.१।। नमस्तीर्थ्याय च कूल्याय च नमः पार्याय चावार्याय च नमः प्रतरणाय चोत्तरणाय च नम आतार्याय चाऽऽलाद्याय च नमः शष्प्याय च फेन्याय च नमः सिकत्याय च प्रवाह्याय च।।८.२।।

।।इति अष्टमोऽनुवाकः।।

नम इरिण्याय च प्रपथ्याय च नमः कि७शिलाय च क्षयणाय च नमः कपर्दिने च पुलस्तये च नमो गोष्ठ्याय च गृह्याय च नमस्तल्प्याय च गेह्याय च नमः काट्याय च गह्वरेष्ठाय च नमो ह्रदय्याय च निवेष्प्याय च नमः पा७सव्याय च रजस्याय च नमः शुष्क्याय च हरित्याय च नमो लोप्याय चोलप्याय च।।९.१।। नम ऊर्व्याय च सूर्म्याय च नमः पर्ण्याय च पर्णशद्याय च नमोऽपगुरमाणाय चाभिघ्नते च नम आख्खिदते च प्रख्खिदते च नमो वः किरिकेभ्यो देवाना७हृदयेभ्यो नमो विक्षीणकेभ्यो देवाना७हृदयेभ्यो नमो विचिन्वत्केभ्यो देवाना७हृदयेभ्यो नम आनिर्हतेभ्यो देवाना७हृदयेभ्यो नम आमीवत्केभ्यः देवाना७हृदयेभ्यो।।९.२।।

।।इति नवमोऽनुवाकः।।

द्रापे अन्धसस्पते दरिद्रन्नीललोहित। एषां पुरुषाणामेषां पशूनां मा भेर्मारो मो एषां किंचनाऽऽममत्।।१०.१।। या ते रुद्र शिवा तनूः शिवा विश्वाहभेषजी।

शिवा रुद्रस्य भेषजी तया नो मृड जीवसे।।१०.२।। इमाꣳरुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतिम्। यथा नः शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम्।।१०.३।। मृडा नो रुद्रो तनो मयस्कृधि क्षयद्वीराय नमसा विधेम ते। यच्छं च योश्चमनुरायजे पिता तदश्याम तव रुद्र प्रणीतौ।।१०.४।।मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम्। मा नो वधीः पितरं मोत मातरं प्रिया मा नस्तनुवो रुद्र रीरिषः।।१०.५।। मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः। वीरान्मानो रुद्र भामितोऽ वधीर्हविष्मन्तो नमसा विधेम ते।।१०.६।। आरात्ते गोघ्न उत पूरुषघ्ने क्षयद्वीराय सुम्नमस्मे ते अस्तु। रक्षा च नो अधि च देव ब्रूह्यथा च शर्म यच्छ द्विबर्हाः।।१०.७।। स्तुहि श्रुतं गर्तसदं युवानं मृगन्न भीममुपहत्नुमुग्रम्। म्रुडा जरित्रे रुद्र स्तवानो अन्यन्ते अस्मन्निवपन्तु सेनाः।।१०.८।। परिणो रुद्रस्य हेतिर्वृणक्तु परित्वेषस्य दुर्मतिरघायोः। अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय म्रुडय।।१०.९।। मीढुष्टम शिवतम शिवो नः सुमना भव। परमे वृक्ष

आयुधं निधाय कृत्तिं वसान आचर पिनाकं विभ्रदागहि॥१०.१०॥ विकिरिद विलोहित नमस्ते अस्तु भगवः। यास्ते सहस्र७ हेतयोऽन्यमस्मन्निवपन्तु ताः ॥१०.११॥ सहस्राणि सहस्रधा बाहुवोस्तव हेतयः। तासामीशानो भगवः परा–चीना मुखाकृधि॥१०.१२॥

॥इति दशमोऽनुवाकः॥

सहस्राणि सहस्रशो ये रुद्रा अधिभूम्याम्। तेषा७ सहस्रयोजनेऽव धन्वानि तन्मसि॥११.१॥ अस्मिन्महत्यर्णवेऽन्तरिक्षे भवा अधि (तेषा७ सहस्रयोजनेऽव धन्वानि तन्मसि) ॥११.२॥ नीलग्रीवाः शितिकण्ठाः शर्वा अधःक्षमाचराः (तेषा७ सहस्रयोजनेऽव धन्वानि तन्मसि )॥११.३॥ नीलग्रीवाः शितिकण्ठा दिव७ रुद्रा उपश्रिताः(तेषा७ सहस्रयोजनेऽव धन्वानि तन्मसि )॥११.४॥ ये वृक्षेषु सस्पिंजरा नीलग्रीवा विलोहिताः(तेषा७ सहस्रयोजनेऽव धन्वानि तन्मसि)॥११.५॥ ये भूतानामधिपतयो विशिखासः कपर्दिनः (तेषा७ सहस्रयोजनेऽव धन्वानि तन्मसि )॥११.६॥ ये अन्नेषु विविध्यन्ति पात्रेषु

पिबतो जनान् (तेषाꣳसहस्रयोजनेऽव धन्वानि तन्मसि)।।११.७।। ये पथां पथिरक्षय ऐलबृदा यव्युधः(तेषाꣳसहस्रयोजनेऽव धन्वानि तन्मसि)।।११.८।। ये तीर्थानि प्रचरन्ति सृकावन्तो निषङ्गिणः ( तेषाꣳसहस्रयोजनेऽव धन्वानि तन्मसि ) ।।११.९।। य एतावन्तश्च भूयाꣳसश्च दिशो रुद्रा वितस्थिरे तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि।।११.१०।। नमो रुद्रेभ्यो ये पृथिव्यां ये। अन्तरिक्षे ये दिवि येषामन्नं वातो वर्षमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणादश प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि।।११.११।। त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात्।।१।। एते सहस्रमयुतं पाशा मृत्योर्मर्त्याय हन्त- वे। तान् यज्ञस्य मायया सर्वानवयजामहे। मृत्यवे स्वाहा मृत्यवे स्वाहा।। नमो भगवते रुद्राय मृत्यूर्मे पाहि।। यो रुद्रो अग्नौ यो अप्सु य ओषधीषु। यो रुद्रो विश्वा भुवनानि विवेश तस्मै रुद्राय नमो अस्तु।।५।। ॐशान्तिः शान्तिः शान्तिः।।

।।इति एकादशोऽनुवाकः।।

।।चमकप्रश्नः।।

ॐ अग्नाविष्णू सजोषसे मा वर्धन्तु वां गिरः। द्युम्नैर्वाजेभिरा गतम्। वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे श्रावश्च मे श्रुतिश्च मे ज्योतिश्च मे सुवश्च मे प्राणश्च मेऽपानश्च मे व्यानश्च मेऽसुश्च मे चित्तं च म आधीतं च मे वाक्च मे मनश्च मे चक्षुश्च मे श्रोत्रं च मे दक्षश्च मे बलं च म ओजश्च मे सहश्च म आयुश्च मे जरा च म आत्मा च मे तनूश्च मे शर्म च मे वर्म च मेऽङ्गानि च मेऽस्थानि च मे परूꣳषि च मे शरीराणि च मे।।१।।

।।इति प्रथमोऽनुवाकः।।

ज्यैष्ठ्यं च म आधिपत्यं च मे मन्युश्च मे भामश्च मेऽमश्च मेऽम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्ष्मा च मे द्राघुया च मे वृद्धं च मे वृद्धिश्च मे सत्यं च मे श्रद्धा च मे जगच्च मे धनं च मे वशश्च मे त्विषिश्च मे क्रीडा च मे मोदश्च मे जातं च मे जनिष्यमाणं च मे सूक्तं च मे सुकृतं च मे वित्तं च मे वेद्यं

च मे भूतं च मे भविष्यच्च मे सुगं च मे सुपथं च म ऋद्धं च म ऋद्धिश्च मे क्लृप्तं च मे क्लृप्तिश्च मे मतिश्च मे सुमतिश्च मे।।२।।

।।इति द्वितीयोऽनुवाकः।।

शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्रं च मे श्रेयश्च मे वश्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च म ऋतं च मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुगं च मे शयनं च मे सूषा च मे सुदिनं च मे।।३।।

।।इति तृतीयोऽनुवाकः।।

ऊर्क्च मे सूनृता च मे पयश्च मे रसश्च मे घृतं च मे मधु च मे सग्धिश्च मे सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रं च म औद्भिद्यं च मे रयिश्च मे रायश्च मे पुष्टं च मे पुष्टिश्च मे विभु च मे प्रभु च मे बहु च मे भूयश्च मे पूर्णं च मे पूर्णतरं च मेऽक्षितिश्च मे

कूयवाश्च मेऽन्नं च मेऽक्षुच्च मे व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे गोधूमाश्च मे मसुराश्च मे प्रियङ्गवश्च मेऽणवश्च मे श्यामकाश्च मे नीवाराश्च मे।।४।।

।।इति चतुर्थोऽनुवाकः।।

अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यं च मेऽयश्च मे सीसं च मे त्रपुश्च मे श्यामं च मे लोहं च मेऽग्निश्च म आपश्च मे वीरुधश्च म ओषधयश्च मे कृष्टपच्यं च मेऽकृष्टपच्यं च मे ग्राम्याश्च मे पशव आरण्याश्च यज्ञेन कल्पन्तां वित्तं च मे वित्तिश्च मे भूतं च मे भूतिश्च मे वसु च मे वसतिश्च मे कर्म च मे शक्तिश्च मेऽर्थश्च म एमश्च म इतिश्च मे गतिश्च मे।।५।।

।।इति पंचमोऽनुवाकः।।

अग्निश्च म इन्द्रश्च मे सोमश्च म इन्द्रश्च मे सविता च म इन्द्रश्च मे सरस्वती च म इन्द्रश्च मे पूषा च म इन्द्रश्च मे बृहस्पतिश्च म इन्द्रश्च मे मित्रश्च म इन्द्रश्च मे वरुणश्च म इन्द्रश्च मे त्वष्टा च म इन्द्रश्च मे धाता च म इन्द्रश्च मे विष्णुश्च म इन्द्रश्च मेऽश्विनौ

च म इन्द्रश्च मे मरुतश्च म इन्द्रश्च मे विश्वे च मे देवा इन्द्रश्च मे पृथिवी च म इन्द्रश्च मेऽन्तरिक्षं च म इन्द्रश्च मे द्यौश्च म इन्द्रश्च मे दिशश्च म इन्द्रश्च मे मूर्धा च म इन्द्रश्च मे प्रजापतिश्च म इन्द्रश्च मे।।६।।

।।इति षष्ठोऽनुवाकः।।

अꣳशुश्च मे रश्मिश्च मेऽदाभ्यश्च मेऽधिपतिश्च म उपाꣳशुश्च मेऽन्तर्यामश्च म ऐन्द्रावायवश्च मे मैत्रावरुणश्च म आश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च मे मन्थी च म आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च म ऋतुग्रहाश्च मेऽतिग्राह्याश्च म ऐन्द्राग्नश्च मे वैश्वदेवश्च मे मरुत्वतीयाश्च मे माहेन्द्रश्च म आदित्यश्च मे सावित्रश्च मे सारस्वतश्च मे पौष्णश्च मे पात्नीवतश्च मे हारियोजनश्च मे।।७।।

।।इति सप्तमोऽनुवाकः।।

इध्मश्च मे बर्हिश्च मे वेदिश्च मे धिष्णियाश्च मे स्रुचश्च मे चमसाश्च मे ग्रावाणश्च मे स्वरवश्च म उपरवाश्च मेऽधिषवणे च मे द्रोणकलशश्च मे वायव्यानि च मे पूतभृच्च

म आधवनीयश्च म आग्नीध्रं च मे हविर्धानं च मे गृहाश्च मे सदश्च मे पुरोडाशाश्च मे पचताश्च मेऽवभृथश्च मे स्वगाकारश्च मे।।८।।

।।इति अष्टमोऽनुवाकः।।

अग्निश्च मे घर्मश्च मेऽर्कश्च मे सूर्यश्च मे प्राणश्च मेऽश्वमेधश्च मे पृथिवी च मेऽदितिश्च मे दितिश्च मे द्यौश्च मे शक्वरीरङ्गुलयो दिशश्च मे यज्ञेन कल्पन्तामृक्च मे साम च मे स्तोमश्च मे यजुश्च मे दीक्षा च मे तपश्च म ऋतुश्च मे व्रतं च मेऽहोरात्रयोर्वृष्ट्या बृहद्रथन्तरे च मे यज्ञेन कल्पेताम्।।९।।।।

।।इति नवमोऽनुवाकः।।

गर्भाश्च मे वत्साश्च मे त्र्यविश्च मे त्र्यवी च मे दित्यवाट् च मे दित्यौही च मे पञ्चाविश्च मे पञ्चावी च मे त्रिवत्सश्च मे त्रिवत्सा च मे तुर्यवाट् च मे तुर्यौही च मे षष्ठवाट् च मे षष्ठौही च म उक्षा च मे वशा च म ऋषभश्च मे वेहच्च मेऽनड्वाञ्च मे धेनुश्च म आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतामपानो यज्ञेन कल्पतां व्यानो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पतां

श्रोत्रं यज्ञेन कल्पतां मनो यज्ञेन कल्पतां वाग्यज्ञेन कल्पतामात्मा यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पताम्।।१०।।

।।इति दशमोऽनुवाकः।।

एका च मे तिस्रश्च मे पञ्च च मे सप्त च मे नव च म एकादश च मे त्रयोदश च मे पञ्चदश च मे सप्तदश च मे नवदश च म एकविꣳशतिश्च मे त्रयोविꣳशतिश्च मे पञ्चविꣳशतिश्च मे सप्तविꣳशतिश्च मे नवविꣳशतिश्च म एकत्रिꣳशच्च मे त्रयस्त्रिꣳशच्च मे च तिस्रश्च मेऽष्टौ च मे द्वादश च मे षोडश च मे विꣳशतिश्च मे चतुर्विꣳशतिश्च मेऽष्टाविꣳशतिश्च मे द्वात्रिꣳशच्च मे षट्त्रिꣳशच्च मे चत्वरिꣳशच्च मे चतुश्चत्वारिव्शच्च मेऽष्टाचत्वारिꣳशच्च मे वाजश्च प्रसवश्चपिजश्च क्रतुश्च सुवश्च मूर्धा च व्यश्नियश्चान्त्यायनश्चान्त्यश्च भौवनश्च भौवनश्चाधिपतिश्च।।११।।

।।इति एकादशोऽनुवाकः।।

ॐ इडा देवहूर्मनुर्यज्ञनीर्बृहस्पतिरुक्था मदा निश७सिषद् विश्वेदेवाः सूक्तवाचः पृथिवी मातर्मा मा हि७सीर्मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यास७शुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवन्तु शोभायै पितरोऽनुमदन्तु।। ॐ शान्तिः शान्तिः शान्तिः।।

## ।। अथ पुरुषसूक्तम् ।।

सहस्त्रशीर्षा पुरुषः सहस्त्राक्षः सहस्त्रपात्। स भूमिं विश्वतो वृत्वा अत्यतिष्ठद्दशाङ्गुलम्।। पुरुषं एवेद७ सर्वं यद् भूतं यच्च भव्यम्। उतामृतत्वस्येशानो यदन्नेनातिरोहति।। एतावानस्य महिमा अतो जायाँश्च पुरुषः।।१।। पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि। त्रिपादूर्ध्वं उदैत् पुरुषः पादोऽस्येहाऽभवात्पुनः।। ततो विष्वङ्व्यक्रामत् साशनाशने अभि। तस्माद्विराडजायत विराजो अधिपुरुषः। स जातो अत्यरिच्यत पश्चाद् भूमिमथो पुरः।।२।। .यत्पुरुषेण हविषा देवा यज्ञमतन्वत। वसन्तो

अस्यासीदाज्यं ग्रीष्म इध्मः शरध्दविः। सप्तास्यासन् परिधयः त्रिसप्त समिधः कृताः। देवा यद्यज्ञं तन्वाना अवघ्नन् पुरुषं पशुम्। तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः।।३।। तेन देवा अयजन्त साध्या ऋषयश्च ये। तस्माद्यज्ञात् सर्वहुतः संभृतं पृषदाज्यम्। पशूंस्ताश्चक्रे वायव्यान् आरण्यान् ग्राम्याश्च ये। तस्माद्यज्ञात्सर्वहुतः ऋचस्सामानि जज्ञिरे। छन्दासि जज्ञिरे तस्मात् यजुस्तस्मादजायत।।४।। तस्मादश्वा अजायन्त ये के चोभयादतः। गावो ह जज्ञिरे तस्मात् तस्माज्ज्ञाता अजावयः। यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्। मुखं किमस्य कौ बाहू कावूरु पादावुच्येते।। ब्राह्मणोऽस्य मुखमासीत्। बाहु राजन्यः कृतः।।५।। ऊरू तदस्य यद्वैश्यः पद्भ्या॒ शूद्रो अजायत।। चन्द्रमा मनसो जातः चक्षोः सूर्यो अजायत। मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत।। नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत। पद्भ्या॒ भूमिर्दिशः श्रोतात् तथा लोका॒ अकल्पयन्।।६।। वेदाहमेतं पुरुषं महान्तम् आदित्यवर्णं तमसस्तु पारे।

सर्वाणि रूपाणि विचित्य धीरः। नामानि कृत्वाऽभिवदन् यदास्ते।। धाता पुरस्ताद्यमुदाजहार शक्रः प्रविद्वान् प्रदिशश्चतस्त्रः। तमेव विद्वानमृत इह भवति नान्यः पन्था अयनाय विद्यते।। यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्। ते ह नाकं महिमानः सचन्ते यत्र पूर्वे साध्याः सन्ति देवाः।।७।। अद्भ्यः संभूतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्तताधि। तस्य त्वष्टा विदधद्रूपमेति तत्पुरुषस्य विश्वमाजानमग्रे।। वेदाहमेतं पुरुषं महान्तम् आदित्यवर्णं तमसः परस्तात्। तमेव विद्वानमृत इह भवति नान्यः पन्था विद्यतेऽयनाय।। प्रजापतिश्चरति गर्भे अन्तः। अजायमानो बहुधा विजायते।।८।। तस्य धीराः परिजानन्ति योनिं मरीचीनां पदमिच्छन्ति वेधसः।। यो देवेभ्य आतपति यो देवानां पुरोहितः। पूर्वो यो देवेभ्यो जातः। नमो रुचाय ब्राह्मये।। रुचं ब्राह्मं जनयन्तः। देवा अग्रे तदब्रुवन्। यस्त्वैव ब्राह्मणो विद्यात् तस्य देवा असन् वशे।।९।। ह्रीश्च ते लक्ष्मीश्च पत्न्यौ अहोरात्रे पार्श्वे नक्षत्राणि रूपम् अश्विनौ व्यात्तम्।

इष्टं म निषाण अमुं म निषाण। सर्वं म निषाण।।१०।। ॐ तच्छंयोरावृणीमहे गातुं यज्ञाय गातुं यज्ञपतये दैवी स्वस्तिरस्तु नः स्वस्तिर्मानुषेभ्यः। ऊर्ध्वं जिगातु भेषजं शन्नो अस्तु व्दिपदे शं चतुष्पदे।।११।। इति पुरुषसूक्तं समाप्तम्।।

अनेन श्रीरुद्रपुरुषसूक्ताभिषेकेन श्री इष्टलिङ्गदेवता प्राणलिंगदेवता भावलिंगदेवता श्री सिद्धेश्वरलिंगदेवता प्रीयतां प्रीयतां प्रीयताम्।

**।। भस्मधारणमंत्रः ।।**

**अनादि शाश्वतं शांतं चैतन्यं चित्स्वरुपकम् ।**
**चिदंगं वृषभाकारं चिद्भस्म लिंगधारणम् ।।**
श्री सांबसदाशिवाय नमः भस्मं धारयामि ।

**।।गंध धारणमंत्रः।।**

**परमानंद सौरभ्यं परिपूर्ण दिगंतरम् ।**
**गृहाण परमं गंधं कृपया परमेश्वर ।।**
श्री सांबसदाशिवाय नमः गंधं धारयामि ।

**।।हरिद्रा।।**

**हरिद्रा स्वर्णवर्णाभ्यां सर्वसौभाग्यदायिनी।**
**गृहाण परमां दिव्याम् अर्पयामि तवानघ।।**
श्री सांबसदाशिवाय नमः हरिद्रां धारयामि।

**।।कुंकुमम्।।**

**रजनी चूर्णसमायुक्तं रक्तवर्णं सुशोभनम् ।**
**सुमांगल्यकरं शुद्धं कुंकुमं ते अर्पयामि अहम् ।।**
श्री सांबसदाशिवाय नमः कुंकुमं धारयामि।

**।। अक्षता ।।**

**अक्षतान् धवलान् दिव्यांस्तिलतंडुलमिश्रितान् ।**
**अर्पयामि महाभक्त्या प्रसीद परमेश्वर ।।**
श्री सांबसदाशिवाय नमः अक्षतान् धारयामि।

**।।बिल्वधारणा।।**

**त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रियायुधम् ।**
**त्रिजन्म पापसंहारमेकबिल्वं शिवार्पणम् ।।**

ॐ नमः शिवाय मंत्रपूर्वक १०८ बिल्वपत्रे इष्टलिंगावर अर्पण करावीत.

**श्री सांबसदाशिवाय नमः बिल्वपत्राणि धारयामि।**

( मध्यमा व अनामिका बोटाने बेल अधोमुख करुन अर्पण करावा)

**।।पुष्पधारणमंत्रः।।**

**तुरीयवनसंभूतं नानागुणसमन्वितम् ।**
**आनंदसौरभं पुष्पं गृह्यतामिदमुत्तमम् ।।**

श्री सांबसदाशिवाय नमः नानाविधपुष्पाणि समर्पयामि।

( मध्यमा व अनामिका बोटाने फुल ऊर्ध्वमुख करुन अर्पण करावे)

## ।।धूपमंत्रः।।

**वनस्पतिररसोपेतो गंधाढ्यो धूप उत्तमः ।**
**आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ।।**
श्री सांबसदाशिवाय नमः धूपमाघ्रापयामि ।

## ।।दीपमंत्रः।।

**स्वप्रकाश महादेवः सर्वांतस्तिमिरापहः ।**
**सबाह्याभ्यंतरं ज्योतिर्दीपोऽयं प्रतिगृह्यताम् ।।**
श्री सांबसदाशिवाय नमः दीपं निराजयामि ।

## ।।कर्पूरदीपमंत्रः।।

**कर्पूरनिर्मितं दीपं स्वर्णपात्रे निवेशितम् ।**
**नीराजितं मया भक्त्या गृहाण परमेश्वर ।।**
**कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्र हारम् ।**
**सदावसंतं हृदयारविंदे भवं भवानी सहितं नमामि ।।१।।**

**गुणातीतकांतं परब्रह्मशांतं सुविद्यादिदेवं भवारण्यदाहम्।।२।।**
**उमानाथमीशं जरा जन्मनाशं परं ज्योतिर्लिंगं नमामि इष्टलिंगम्।।३।।**

श्री सांबसदाशिवाय नमः कर्पूरदीपं निराजयामि।

**।।नैवेद्यमंत्रः।।**

**नैवेद्यं षड्रसोपेतं नानाभक्ष्यसमन्वितम् ।**
**दधिक्षीरघृतोपेतं नैवेद्यं प्रतिगृह्यताम् ।।**

श्री सांबसदाशिवाय नमः नैवेद्यं निवेदयामि, नैवेद्यान्ते पानीयं समर्पयामि।

**।।ताम्बूलमंत्रः।।**

**पूगीफलसमायुक्तं नागवल्लीदलैर्युतम् ।**
**कर्पूरचूर्णसंयुक्तं तांबूलं प्रतिगृह्यताम् ।।**

श्री सांबसदाशिवाय नमः तांबूलं निवेदयामि, तांबूलान्ते पानीयं समर्पयामि।

**।।दक्षिणामंत्रः।।**

**हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।**
**अनन्तपुण्यफलदं प्रयच्छामि महेश्वर ।।**

श्री सांबसदाशिवाय नमः सुवर्णदक्षिणां समर्पयामि, अर्घ्यं स्वाहा।

**।। घंटानादमंत्रः ।।**

**आगमार्थं तु देवानां गमनार्थं तु रक्षसाम् ।**
**कुर्वे घंटारवं नित्यं सर्वोपद्रवनाशनम् ।।**

श्री सांबसदाशिवाय नमः घंटानादं श्रावयामि ।

**।।पुष्पांजलिमंत्रः।।**

**यज्ञेन यज्ञमयजन्त देवास्तानि धर्मानि प्रथमान्यासन् ।**
**तेहनाकं महिमानः सचन्त यत्र पूर्वे साध्या सन्ति देवाः ।।**

श्री सांबसदाशिवाय नमः पुष्पांजलिं समर्पयामि ।

**।।प्रदक्षिणामंत्रः।।**

**प्रकृष्टपापनाशाय प्रकृष्टफलसिद्धये ।**
**प्रदक्षिणं करोमीश प्रसीद परमेश्वर ।।**
श्री सांबसदाशिवाय नमः प्रदक्षिणं करोमि ।

**।।नमस्कारमंत्रः।।**

**नमः शिवाय शान्ताय नमः सोमाय शंभवे ।**
**नमः शिवाय कल्याणीपतये ते नमो नमः ।।**
श्री सांबसदाशिवाय नमः नमस्कारं करोमि ।

**।।स्तोत्रम्।।**

**हर शंभो महादेव विरूपाक्ष त्रिलोचन ।**
**दयासिन्धो दीनबन्धो रक्ष रक्ष महेश्वर ।।**
**मायासमुद्रपतितम् अनन्तकलुषान्वितम् ।**
**मामुद्धरं महेशान भक्तवत्सल शंकर ।।**
श्री इष्टलिंग ध्यान करावे व लिंगपादोदक स्वीकारावे.

**।।तीर्थस्वीकारमंत्रः।।**

**ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिंगलम् ।**

**ऊर्ध्वरेतं विरुपाक्षं विश्वरूपाय वै नमो नमः ।।**

श्री सांबसदाशिवाय नमः तीर्थं स्वीकरोमि ।

इष्टलिङ्गतीर्थ स्वीकार केल्यानंतर इष्टलिंगांची संक्षिप्त पूजा करावी.

मंत्रलोपः तंत्रलोपः क्रियालोपः विध्दापराध–प्रायश्चित्तार्थं मूलमंत्रं जपं करिष्ये। गुरुपदिष्ट महामंत्र पंचाक्षरी मंत्राचा११वेळा जप करावा.

**अपराधसहस्त्राणि क्रियन्तेऽहर्निशं मया ।**

**पाहि माम् अपराधेभ्यः पितापुत्रमिव प्रियम् ।।**

पुष्पासह अक्षतोदक कनिष्ठिका बोटाने अभिषेक पात्रात सोडावे.

## द्वादशज्योतिर्लिंग स्तोत्रम्

**सौराष्ट्रे सोमनाथं च श्रीशैले मल्लिकार्जुनम् ।**
**उज्जयिन्यां महाकालमोंकारममलेश्वरे ।।१।।**
**परल्यां वैद्यनाथं च डाकिन्यां भीमशंकरम् ।**
**सेतुबन्धे तु रामेशं नागेशं दारुकावने ।।२।।**
**वाराणस्यां तु विश्वेशं त्र्यंबकं गौतमीतटे ।**
**हिमालये तु केदारं घृसृणेशं शिवालये ।।३।।**
**एतानि ज्योतिर्लिंगानि सायं प्रातः पठेन्नरः ।**
**सप्तजन्मकृतं पापं स्मरणेन विनश्यति ।।४।।**

अहर्निश श्री इष्टलिंगास अर्पण करुनच सर्वांचा स्वीकार करावा. रात्री झोपण्यापूर्वी श्री गुरुंना व श्री इष्टलिंगास नमन करावे श्रीमद् जगद्गुरु पंचाचार्या मां रक्षत असे स्मरण करावे.

***